श्री शिव षडक्षर स्तोत्रं

श्री शिव षडक्षर स्तोत्रं

1। रुद्रयामले
ओंकारं बिंदुसंयुक्तं नित्यं ध्यायंति योगिनः |
कामदं मोक्षदं चैव ओंकाराय नमो नमः || 1 ||

नमंति ऋषयो देवा नमंत्यप्सरसां गणाः |
नरा नमंति देवेशं नकाराय नमो नमः || 2 ||

महादेवं महात्मानं महाध्यानपरायणं |
महापापहरं देवं मकाराय नमो नमः || 3 ||

शिवं शांतं जगन्नाथं लोकानुग्रहकारकं |
शिवमेकपदं नित्यं शिकाराय नमो नमः || 4 ||

वाहनं वृषभो यस्य वासुकिः कंठभूषणं |
वामे शक्तिधरं देवं वकाराय नमो नमः || 5 ||

यत्र यत्र स्थितो देवः सर्वव्यापी महेश्वरः |
यो गुरुः सर्वदेवानां यकाराय नमो नमः || 6 ||

षडक्षरमिदं स्तोत्रं यः पठेच्छिवसन्निधौ |
शिवलोकमवाप्नोति शिवेन सह मोदते || 7 ||

2। श्रीमच्छंकरचार्यकृतं
ओंकारं बिंदुसंयुक्तं नित्यं ध्यायंति योगिनः |
कामदं मोक्षदं तस्मादोंकाराय नमो नमः || 1 ||

ॐ नं,
नमंति मुनयस्सर्वे नमंत्यप्सरसां गणाः |
नराणामादिदेवाय नकाराय नमो नमः || 2 ||

ॐ मं,
महत्तत्त्वं महादेवप्रियं ज्ञानप्रदं परं |
महापापहरं तस्मान्मकाराय नमो नमः || 3 ||

ॐ शिं,
शिवं शांतं शिवाकारं शिवानुग्रहकारणं |
महापापहरं तस्माच्छिकाराय नमो नमः || 4 ||

ॐ वां,
वाहनं वृषभो यस्य वासुकिः कंठभूषणं |
वामे शक्तिधरं देवं वकाराय नमो नमः || 5 ||

ॐ यं,
यकारे संस्थितो देवो यकारं परमं शुभं |
यं नित्यं परमानंदं यकाराय नमो नमः || 6 ||

यः क्षीरांबुधि मंथनोद्भव महाहालाहलं भीकरं
दृष्ट्वा तत्रपलायितास्सुरगणान्नारायणादींतदा |
संपीत्वा परिपालयज्जगदिदं विश्वाधिकं शंकरं
सेव्यो नस्सकलापदां परिहरन्कैलासवासी विभुः || 7 ||

षडक्षरमिदं स्तोत्रं यः पठेच्छिवसन्निधौ |
तस्य मृत्युभयं नास्ति ह्यपमृत्युभयं कुतः || 8 ||

यत्कृत्यं तन्नकृतं
यदकृत्यं कृत्यवत्तदाचरितं |
उभयोः प्रायश्चित्तं
शिव तव नामाक्षरद्वयोच्चरितं || 9 ||

शिवशिवेति शिवेति शिवेति वा
भवभवेति भवेति भवेति वा |
हरहरेति हरेति हरेति वा
भजमनश्शिवमेव निरंतरं || 10 ||

इति श्रीमच्छंकरचार्यकृत शिवषडक्षरीस्तोत्रं संपूर्णं |